## प्रे द्रुस्तुस्रुवः । (२७/३१९८)

प्रशब्दे उपपदे द्रु स्तु स्रु इत्येतेभ्यो धातुभ्यो घञ् प्रत्ययो भवति[1]। प्रद्रावः। प्रस्तावः। प्रस्रावः। प्र इति किम्? द्रवः। स्तवः। स्रवः॥

## निरभ्योः पूल्वोः । (२८/३१९९)

पू इति पूङ्पूञोः [2]सामान्येन ग्रहणम्। 'लूञ् छेदने' (धा.पा.१४८४)। यथासङ्ख्यमुपसर्गसम्बन्धः। निरभिपूर्वयोः पूल्वोर्धात्वोः घञ् प्रत्ययो भवति। निष्पावः। अभिलावः। निरभ्योः इति किम्? पवः। लवः॥

## उन्न्योर्ग्रः । (२९/३२००)

'गॄ शब्दे' (धा.पा.१४९९), 'गॄ निगरणे' (धा.पा.१४११), द्वयोरपि ग्रहणम्। उन्न्योरुपपदयोः गॄ इत्येतस्माद् धातोः घञ् प्रत्ययो भवति। उद्गारः समुद्रस्य। निगारो देवदत्तस्य। उन्न्योः इति किम्? गरः॥

## कॄ धान्ये । (३०/३२०१)

उन्न्योः इति वर्तते। कॄ इत्येतस्माद् धातोरुन्न्योः उपपदयोः घञ् प्रत्ययो भवति, धान्यविषयश्चेद् धात्वर्थो भवति। विक्षेपार्थस्य किरतेर्ग्रहणं, [3]न हिंसार्थस्य, अनभिधानात्। उत्कारो धान्यस्य। निकारो धान्यस्य[4]। धान्ये इति किम्? [5]भैक्ष्योत्करः। [6]पुष्पनिकरः॥

## यज्ञे समि स्तुवः । (३१/३२०२)

यज्ञविषये प्रयोगे सम्पूर्वात् स्तौतेर्घञ् प्रत्ययो भवति। संस्तावः छन्दोगानाम्। [7]समेत्य स्तुवन्ति यस्मिन देशे छन्दोगाः स देशः संस्तावः इत्युच्यते। यज्ञे इति किम्? संस्तवः छात्रयोः[8]॥

## प्रे स्त्रोऽयज्ञे । (३२/३२०३)

स्तॄञ् [9]आच्छादने (धा.पा. १२५३), अस्माद् धातोः प्रशब्दे उपपदे घञ् प्रत्ययो भवति [10]न चेद् यज्ञविषयः प्रयोगो भवति। शङ्खप्रस्तारः[11]। [12]अयज्ञे इति किम्? बर्हिष्प्रस्तरः॥

---

1. अपोऽपवादः इत्यधिकम् ड. 2. सामान्यग्रहणं ब, नास्ति फ. 3. अहिंसार्थस्य ह. 4. धान्यक्षेप इत्यर्थः, धान्यराशिः इत्यधिकम् ग. 5. भिक्षोत्करः अ, भैक्षोत्करः ब. क. ड, भैक्षोत्कारः क. 6. पुष्पोत्करः क. 7. वाक्यमिदं नास्ति फ. 8. संस्तवः परिचयः इत्यधिकम् अ. 9. आच्छादने नास्ति ब. 10. अयज्ञविषयः प्रयोगो भवति चेत् फ. 11. मणिप्रस्तारः इत्यधिकम् अ. ब. क. 12. यज्ञे तु दर्भप्रस्तरः अ.